कुरा । वसुलघुद्वीर्घयुगलका भवति सखेऽमृततिलका इत्युक्त-लक्षणे द्वयाक्षरपादके वर्णवृत्तभेदे "त्वरितगतिश्च नजन-गैरित्युक्तत्वरितगतिलक्षणाक्रान्तत्वात् तस्या एव नामान्तरम्।

**अमृतदीधिति** पु० अमृतमिवाप्यायिका दीधितिरस्य । चन्द्रे "अमृतदीधितिरेष विदर्भजे भजसि तापममुष्य" नै० ।

**अमृतद्युति** पु० अमृतमिवाप्यायिका द्युतिरस्य । चन्द्रे ।

**अमृतधारा** स्त्री अमृतस्य धारा सन्ततिः । अमृतसन्ततौ । "चरमचरणलयमवसितिगुरुयुग्मम् । अखिलमपरमुपरि-गतमिति ललितपदयुक्ता तदियममृतधारा" वृ०र० उक्ते-१पदचतुरूर्द्ध्वपदके २छन्दोभेदे । उपरिगतम् "सुखपादोऽष्ट-भिर्वर्णैः परेऽस्मान्मकरालयैः क्रमाद्वृद्धा" इत्याद्युक्तलक्षणम् है त० । २सुधासन्ततौ च । [उपनिषच्छब्दे विवरणम् ।

**अमृतनाद** पु० उपनिषद्भेदे सा च कृष्णयजुर्वेदान्तर्गता

**अमृतनालिका** स्त्री अमृतस्य स्वादुरसस्य नालीव । कर्पूर-नालिकाभेदे पक्वान्नभेदे शब्द०र० ।

**अमृतप** पु० अमृतं पाति रक्षति असुरेभ्यः पा-रक्षणे क । १विष्णौ सहि अमृतमन्थनसमये असुरैर्ह्रियमाणममृतं मोहिनीरूपं विधाय तान् वञ्चयित्वा देवेभ्योदानात् तत् पालकः इति भागवती कथा । "सोमपोऽमृतपः सोम" इति वि०स० । अमृतं पिबति पा-पाने क । २देवे तद्दर्शनेन तृप्तत्वात्तत्पायित्वम् अमृतशब्दे दृश्यम् । ३ अमृततुल्यम-ध्वादिपातरि त्रि० । "भुवममृतपनामवाञ्छयासावधरमसु मधुपस्तवाजिह्वीते" माघः ।

**अमृतपक्ष** पु० अमृतस्य हिरण्यस्य पक्षः क्षयाकारित्वात् । १वह्नौ "अग्नौ सुवर्णमक्षीणम्," या० उक्तेः सर्व्वदाहक-स्यापि वह्ने न सुवर्णनाशकत्वमित्यतस्तस्य स्वर्णपक्षत्वम् । "तस्येतावमृतपक्षौ यावेतावभितोऽग्नी" इति शत०ब्रा० अमृतं स्वर्णमिव पीतौ पक्षावस्य । १स्वर्णवर्णपक्षे श्येनभेदे "हिरण्यपक्षः शकुनोभुरण्युममृतं वै हिरण्यमृतपक्षः शकुनः" शत०ब्रा० ।

**अमृतफल** न० अमृतमिव स्वादु फलम् । (नासपातीति) १ यवनप्रसिद्धे रुचिफले "अमृतफलं लघु वृष्यं सुस्वादु त्रीनुहरेद्दोषान् । देशेषु सुद्गलानां बहुलं तल्लभ्यते लैकैः भा०प्र० । ई०ब० । २ आमलक्याम् ३ द्राक्षायाञ्च स्त्री ४पटोले ५पारावतवृक्षे च पु० ।

**अमृतबन्धु** पु० अमृतस्य बन्धुः एकस्थानोत्पत्तिकत्वात् सहो-दरः । १ चन्द्रे तस्य अमृतमन्थनसमये समुद्रात् उत्पन्नत्वात् तथात्वम् । "ततः शतसहस्रांशुर्मथ्यमानात् सागरात् अमृतात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वल" इति भा०आ० प० । अमृतस्य बन्धुरिव ग्राहकत्वात् । २ देवमात्रे "तं देवा अन्वजानन्त भद्रा अमृतबन्धवः" ऋ० १०,७२,५, ।

**अमृतभल्लातकी** स्त्री "सुपक्वभल्लातफलानि सम्यक् द्विधा विदा र्याढकसम्मितानि । विपाच्य तोयेन चतुर्गुणेन चतुर्थशेषेव्य-पनीय तेन ॥ पुनः पचेत् क्षीरचतुर्गुणेन घृतांशयुक्तेन घनं यथा स्यात् । सितोपलाः षोडशभिः पलैस्तु विमिश्र्य सं-स्थाप्य दिनानि सप्त ॥ ततः प्रयोज्याग्निबलेन मात्रां ज-येद् गुदोत्थानखिलान् विकारान् । कचान् सुनीलान् घन-कुञ्चिताग्रान् सुवर्णदृष्टिं सुकुमारताञ्च ॥ जवं हयानाञ्च मतङ्गजं बलं, स्वरं मयूरस्य हुताशदीप्तिम् । स्त्रीवल्लभत्वं लभते प्रजाञ्च नीरोगमब्दद्विशतानि चायुः ॥ न चान्नपाने परिहार्य्यमस्ति न चातपे चाध्वनि मैथुने च । प्रयोगकाले सकलामयानां राजा ह्ययं सर्व्वरसायनानाम् ॥ भल्लातकी शुद्धिरिह प्रागिष्टा चूर्णगुरुषणात् । घृताच्चतुर्गुणं क्षीरं घृतस्य प्रस्थ इष्यते" चक्रदत्तोक्ते घृतभेदे ।

**अमृतभुज्** पु० अमृतं भुङ्क्ते दृष्ट्वा भोगतुल्यं तृप्तिमश्नुते भुज-क्विप् है त० । देवे "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्तीति" छा०उ० उक्तेः दर्शनमात्रेण भोजनतृप्ति-मत्त्वात्तथात्वम् । अमृतम् अयाचितं यज्ञशिष्टान्नं वा भुङ्क्ते । २ यज्ञशिष्टान्नभोक्तरि ३ अयाचितान्नभोक्तरि च त्रि० ।

**अमृतयोग** पु० अमृताख्योयोगः । ज्योतिषोक्ते । तिथि-वारादियोगभेदे स चामृतशब्दे उक्तः ।

**अमृतरस** पु० अमृतं रस इव आस्वाद्यम् । १ अमृतरूपे आस्वाद्ये "विम्लानोन विमर्द्देनेऽमृतरसप्रस्यन्दमाध्वीकभूः" कुमा० । अमृतस्य रसः सारः । २सुधारसे "सिक्ता इवामृ-तरसेन मुहुर्जनानाम्" माघः । अमृतं मोक्षः रस इव यस्य । ३ परमात्मनि "स एष सैन्धवघनोऽमृतरस इति" श्रुतिः अमृतस्येव रस आस्वादोऽस्याः । ४ कपिलाद्राक्षायां (अन्द्रसा) प्रसिद्धे ५ पक्वान्नभेदे च स्त्री । सा च "तृतीयभागखण्डेन मिश्रितं षष्टिपिष्टकम् । शुभ्रमीषद्दधि-युतं मर्द्दयेद्दृढ़पाणिना । एवं समुद्धितं कृत्वा स्थापयेद्र-जनीमितम् । ततोऽन्यस्मिन्नहनि तु चिक्कितं निस्तृचैन्तिलैः विधाय पूपकं तेन तप्तिकायां घृते पचेत् । ततोऽमृतरसा जाता वातहृद्बलवर्द्धिनी" इति भा०प्र० उक्ता ।

**अमृतलता** स्त्री अमृतालता । १ गुडूच्याम्" (अमरलता) इति २ ख्यातायां लतायाञ्च ।

**अमृतवपुस्** अमृतेनाप्यायितं वपुरस्य । १ चन्द्रे स हि कृष्ण-